एवं [1]लाङ्गलाः। [2]शैलालाः। शिखण्डिनः [3]शैखण्डाः। सूकरसद्मनः[4] सौकरसद्माः। [5]सुपर्वणः सौपर्णाः।

[७९९] अश्मनो विकार उपसङ्ख्यानम्। (म.भा. ३.२२६)

अश्मनो विकारः आश्मः। अश्मनोऽन्यः।

[८००] चर्मणः कोश उपसङ्ख्यानम्। (म.भा. ३.२२६)

चार्मः कोशः। चार्मणोऽन्यः।

[८०१] शुनः सङ्कोच उपसङ्ख्यानम्। (म.भा. ३.२२६)

शौवः सङ्कोचः। शौवनोऽन्यः।

[८०२] अव्ययानां च सायंप्रातिकाद्यर्थमुपसङ्ख्यानम्। (म.भा. ३.२२६)

के पुनः सायंप्रातिकादयः? येषामव्ययानाम[6]विहितष्टिलोपः, प्रयोगे च दृश्यते, ते सायंप्रातिकप्रकाराः [7]ग्रहीतव्याः। सायंप्रातर्भवः सायंप्रातिकः। पौनःपुनिकः। बाह्यः। कौतस्कुतः[8]। 'कालाट् ठञ्' (४.३.११/१३८१) इति ठञ्प्रत्ययः। टचुटचुलौ तु नेष्येते[9]। आरातीयः, शाश्वतिकः, शाश्वतः इत्येवमादिषु न दृश्यते टिलोपः[10]॥

## अह्नष्टखोरेव। (१४७/७८०)

अहन् इत्येतस्य टखोरेव [11]परतः [12]टिलोपो भवति। द्वे अहनी समाहृते द्व्यहः। त्र्यहः। द्वे अहनी अधीष्टो भृतो भूतो भावी वा द्व्यहीनः। त्र्यहीनः। अह्नां समूहः क्रतुः अहीनः।

[८०३] [13]अह्नः समूहे खो वक्तव्यः।

सिद्धे सति आरम्भो नियमार्थः। इह मा भूत्, अह्ना निर्वृत्तम् आह्निकम्। एवकारकरणं विस्पष्टार्थम्। अह्नः एव टखोः [14]इत्येवं नियमो न [15]भविष्यति, 'आत्माध्वानौ खे' (६.४.१६९/१६७१) [16]इति प्रकृतिभाव-[17]विधानात्॥

## ओर्गुणः। (१४६/८४७)

उवर्णान्तस्य भस्य गुणो भवति तद्धिते परतः। बाभ्रव्यः। माण्डव्यः। शङ्कव्यं दारु। पिचव्यः कार्पासः। कमण्डलव्या मृत्तिका। परशव्यमयः। औपगवः। कापटवः। ओरोत् इति वक्तव्ये गुणग्रहणं सञ्ज्ञापूर्वको विधिरनित्यो[18] (व्या.प. ६४) यथा स्यात्, तेन स्वायम्भुवः इति सिद्धं भवति॥

---

1. जाङ्गलाः ब. 2. नास्ति फ. क, शिलालिनः इमे इत्यधिकम् ब. ह. 3–4. इमे इत्यधिकम् फ. 5. उदाहरणमिदं नास्ति फ. 6. अविहितलक्षणः फ.ह. 7. वेदितव्याः फ. 8. अव्ययसमुदायोऽपि अव्ययग्रहणेन गृह्यते इत्यधिकम् फ.ह. 9. बहुषु टिलोपवचनं ज्ञापकम् अव्ययादिनां टिलोपः नित्यः इति इत्यधिकम् फ. ह. 10. विभाषाग्रहणं चानुवर्तते। सा च व्यवस्थितविभाषा व्याख्यायते इत्यधिकम् ह. 11. प्रत्यययोः इत्यधिकम् फ. 12. टेर्लोपो भवति फ.ह. 13. क्रतौ इत्यधिकम् फ.ह. 14. एषः क.ड.ह. 15. भवति फ. 16. इति नास्ति फ. 17. विधानसामर्थ्यात् फ.ह. 18. इति ज्ञापयत्याचार्यः इत्यधिकम् फ.